संज्ञायां कन् (उलुड़) तृणभेदे पु० रत्नमालाकोषः ।

**स्थूलकङ्गु** पु० कर्म० । वरकधान्ये (बोरधान) राजनि० ।

**स्थूलकणा** स्त्री कर्म० । १स्थूलजीरके राजनि० ६त० । २पीनकणायुते त्रि० ।

**स्थूलकण्टक** पु० स्थूलः कण्टकोऽस्य । जालवर्वुरे राजनि० कप् अत इत्त्वम् । स्थूलकण्टकिका शाल्मलीवृक्षे स्त्री ।

**स्थूलकण्टा** स्त्री स्थूलः कण्टः कण्टकोऽस्याः । वृहत्याम् राजनि० ।

**स्थूलकन्द** पु० स्थूलः कन्दोऽस्य । १रक्तलशुने २शूरणे ३हस्तिकन्दे ४मानके च राजनि० ।

**स्थूलक्ष्वेड़** पु० स्थूलः क्ष्वेड़ो यत्र । वाणे त्रिका० ।

**स्थूलचञ्चु** पु० स्थूला चञ्चुरिव शिखाऽस्य । १महाचञ्चुशाके राजनि० २वृहच्चञ्चुयुते त्रि० ।

**स्थूलजीरक** पु० कर्म० । जीरकभेदे (कालजिरा) भावप्र० ।

**स्थूलताल** पु० कर्म० । हिन्ताले राजनि० ।

**स्थूलत्वचा** स्त्री स्थूला त्वचा यस्य । काश्मर्य्याम् राजनि० ।

**स्थूलदण्ड** पु० स्थूलो दण्डोऽस्य । देवनले राजनि० । स्थूलनालोऽप्यत्र । [राजनि० ।

**स्थूलदर्भ** पु० स्थूलं दृढ़ं दभ्यतेऽनेन दभ–घञ् । मुञ्जे (मुज)

**स्थूलदला** स्त्री स्थूलानि दलानि यस्याः । घृतकुमार्य्याम् राजनि० ।

**स्थूलनास** पुंस्त्री० स्थूला नासाऽस्य । १शूकरे हेमच० स्त्रियां ङीष् । २वृहन्नासायुते त्रि० स्त्रियां ङीप् । स्त्रियां टाप् स्थूलनासिकोऽप्यत्र ।

**स्थूलपट्ट** पु० स्थूलं पट्टं यस्मात् । कार्पासे शब्दर० तत्स्थलज पट्टस्य स्थूलत्वात्तथात्वम् । पृषो० स्थूलपट्टाक तत्रार्थे पु० शब्दर० ।

**स्थूलपाद** पुंस्त्री० स्थूलाः पीनाः पादा अस्य नान्त्यलोपः समा० । १गजे शब्दमा० स्त्रियां ङीष् । ७त० । २श्लीपदरोगे च ।

**स्थूलपुष्प** पु० स्थूलं पुष्पं यस्य । १वकवृक्षे २पर्वतजातापराजितायां स्त्री रत्नमा० । ३यवतिक्तायां स्त्री राजनि० ङीप् ।

**स्थूलफल** पु० स्थूलं फलमस्य । १शाल्मलीवृक्षे राजनि० । २वृहत्फलान्विते त्रि० । ३शणपुष्प्यां स्त्री राजनि० ।

**स्थूलभूत** न० कर्म० । वेदान्तोक्ते प्रत्येकं पञ्चात्मकतामापन्ने पृथिव्यादौ भूते ।

**स्थूलमरिच** न० नित्यकर्म० । कक्कोले राजनि० ।

**स्थूलमूल** न० । ६त० । चाणक्यमूले राजनि० ।

**स्थूललक्ष(क्ष्य)** त्रि० स्थूलं लक्षयति दानाय संकल्पते लक्ष–अण् स्थूलंलक्ष्यं वाऽस्य । बहुदातरि अमरः ।

**स्थूलवर्म्मकृत्** पु० स्थूलं वर्म्म करोति कृ–क्विप् । आह्लाणयष्टिकायाम् शब्दर० । [२स्थूलत्वचान्विते त्रि० ।

**स्थूलवल्कल** पु० स्थूलं वल्कलमस्य । १रक्तलोध्रे जटा० ।

**स्थूलवृक्षफल** पु० स्थूलस्य वृक्षस्येव फलमस्य । स्निग्धपिण्डीतकवृक्षभेदे (मयना) राजनि० । [राजनि० ।

**स्थूलवैदेही** स्त्री विदेहे भवा अण् कर्म० । गजपिप्पल्याम्

**स्थूलशाटक** पु० कर्म० । स्थूलवस्त्रे अमरः स्थूलशाटिकाद्याऽप्यत्र स्त्री जटा० ।

**स्थूलशालि** पु० कर्म० । महाशालौ राजनि० ।

**स्थूलशीर्षिका** स्त्री स्थूलं शीर्षं यस्याः कप् अत इत्त्वम् । क्षुद्रपिपीलिकायाम् हेमच० । २वृहन्मस्तकयुते त्रि० ।

**स्थूलषट्पद** पु० षट्पद इव स्थूलः राज० । वरटायाम्

**स्थूलस्कन्ध** पु० स्थूलः स्कन्धोऽस्य । लकुचे (मान्दार) राजनि० ।

**स्थूलहस्त** न० स्थूलः हस्त इवाकारोऽस्य । गजशुण्डे त्रिका०

**स्थूलांशा** स्त्री स्थूलः अंशोऽवयवोऽस्याः । १गन्धपलाशायाम् राजनि० २स्थूलावयवे त्रि० ।

**स्थूलाम्र** पु० कर्म० । आम्रभेदे राजाम्रे राजनि० ।

**स्थूलास्य** पुंस्त्री० स्थूलमास्यं यस्य । १सर्पे शब्दच० स्त्रियां जातित्वेऽपि योपधत्वात् टाप् । २वृहन्मुखयुते त्रि० ।

**स्थूलैरण्ड** पु० कर्म० । वृहदेरण्डवृक्षे राजनि० ।

**स्थूलैला** स्त्री कर्म० । वृहदेलायाम् (वड़ एलाइच) राजनि० ।

**स्थूलोच्चय** पु० स्थूलानामुपलानामुच्चयो यत्र । १गण्डशैले स्थूलस्य गजस्य उच्चयः । २गजमध्यगतौ ३वरण्डे ४असाकल्ये मेदि० ५गजदन्तच्छिद्रे च शब्दमा० ।

**स्थेय** पु० स्थीयते विवादनिर्णायकतयाऽसौ स्था–कर्मणि यत् । विवादे १संशयनिर्णायके (जुरी) २पुरोहिते च मेदि० ३स्थिरे त्रि० हेमच० ।

**स्थेयस्** त्रि० अतिशयेन स्थिरः ईयसुन् स्थादेशः । १स्थिरतरे २शाश्वते त्रि०भरतः । स्त्रियां ङीप् । इष्ठन् स्थेष्ठोऽप्यत्र त्रि०

**स्थैर्य्य** न० स्थिरस्य भावः ष्यञ् । स्थिरतायाम् ।

**स्थौणेय(क)** पु० स्थूणायां तत्समीपे भवः ढक् ढकञ् वा । ग्रन्थिपर्णनामगन्धद्रव्ये (गाँठियाला) अमरः । "स्थौणेयकं बर्हिवर्हं शुकवर्हञ्च कुक्कुरम् । शीर्षं रोमशकं चापि शुकपुष्पं शुकच्छदम् । स्थौणेयकं कटु स्वादु तिक्तं स्निग्धं त्रिदोषनुत् । मेधाशुक्रकरं त्वच्यं रक्षोऽघ्नोज्वरजन्तुजित् । हन्ति कुष्ठास्रदद्दाहरोगंत्यतिलकालकान् ।